'अतिहाय्रेडो बर्हिः प्रतिसमानयति,—इति उच्यते तेन बर्हिषः चतुर्थतां दर्शयति, सा पाठक्रमे नियामकोऽव कल्पते" भा०

"प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्" ८सू०

"वाजपेये "सप्तदश प्राजापत्यान् पशून् आलभते"—इति श्रूयते। तेषु पशुषु चोदकप्राप्ताःप्रोक्षणादयो धर्माः, तत्र प्रथमः पदार्थो यतः कुतश्चिदारब्धव्यः द्वितीयादिषु भवति संशयः,— किं तत एव द्वितीयोऽपि पदार्थ आरब्धव्यः ? उत द्वितीयादिषु अनियमः?—इति। किं तावत् प्राप्तम्? नियमकारिणः शास्त्रस्याभावात् अनियमः-इति। एवं प्राप्ते, ब्रूमः,—यतः पूर्व आरब्धः, ततएव द्वितीयादयोऽपि पदार्था आरब्धव्याः—इति। कुतः एतत्?। 'तदुपक्रमात्' सर्वे हि पदार्था प्रधानकालात् न विप्रकृष्टव्याः, प्रधानं हि चिकीर्षितं, कृतं वा तेषां निमित्तं, सहवचनं हि भवति"-'पदार्थैः सह प्रधानं कर्त्तव्यम्'—इति। बहुपदार्थसमाम्नानात्तु अवश्यम्भावी विप्रकर्षः, तथापि तु यावद्भिर्नाव्यवहितः शक्यः पदार्थः कर्तुम्, तावद्भिर्व्यवधानम् अवशयं कर्त्तव्यम्। ततोऽभ्यधिकेन न व्यवधातव्यम्—इति, यदि द्वितीयं पदार्थमन्यत आरभेत, ततोऽधिकैरपि व्यवदध्यात्, तथा प्रयोगवचनं बाधेत!। 'ननु तथा सति कश्चिदल्पैर्व्यवहितो भविष्यति'। उच्यते,—अनुमतानां व्यवधायकानां त्यागेन कश्चित् अभ्यधिको गुणो भवति—इति तस्मात् यतः पूर्वपदार्थ आरब्धः तत एव उत्तर आरम्भणीयः—इति" भा०

"सर्वमिति चेत्" ९सू०

"इति चेत् पश्यसि, प्रधानाविप्रकर्षेण प्रयोगवचनानुग्रहः—इति, सर्वं तर्हि—गुणकाण्डम् एकस्मिन् अपवर्जयितव्यं, यथा सौर्यादिषु" भा०।

"नाकृतत्वात्" १०सू०।

"नैतदेवम्, सहप्रयोगे एवं हि न अनुष्ठितः स्यात्" भा०।

"क्रत्वन्तरवदिति चेत्"। ११सू०

"अथ यदुक्तं,—यथा क्रत्वन्तरेषु सौर्यादिषु—इति, तत् परिहर्त्तव्यम्" भा०

"नासमवायात्" १२सू०

"न तेषामर्थात् क्रमः प्राप्नोति, यो नियम्येत, अङ्गाश्रयो हि नियमो भवितुमर्हति, अनङ्गासमाश्रयस्य स्वयमङ्गता कल्प्येत" भा०

"स्थानाच्चोत्पत्तिसंयोगात्" १३ सू०

"एकविंशेन अतिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकामम्" इत्येवमादि श्रूयते। तत्र आगमेन सङ्ख्यापूरणम्—इति वक्ष्यते। तत्र आगमे क्रियमाणे, किम् अनियमजक्रमाः सर्व्वा ऋच आगमयितव्याः? उत काण्डक्रमेभ्यः? इति। किं प्राप्तम्?—अनियमेन—इति। कुतः? अतिरात्रे त्रिणवादिशब्दार्थैनैताः प्राप्नुवन्ति, तत्र एतासां प्राप्नुवतीनाम् पाठक्रमो नास्ति—इति। एवं प्राप्ते उच्यते,—यदासां सामाम्नाये स्थानं, तेनैता अत्र नियम्यन्ते, याः पूर्वं समाम्नाताः, ताः पूर्वमेव प्रयोक्तव्याः, आनुपूर्व्यस्य हि दृष्टमेतत् प्रयोजनम्, यदुत्तरस्मरणं, तदपि चिकीर्षितमेव—इति। त्रिणवादिशब्दैः अतिरात्रे यौगपद्येन आसां प्राप्तेः पाठक्रमस्य अविषयः—इति अधिकरणान्तरम्—इति भवति मतिः। समाम्नायपाठक्रमादेव अत्र नियमः—इति पुनरुक्ततागम्यते—इति अन्यथा वर्ण्यते" १मत०

"साद्यस्क्रे श्रूयते,—सह पशूनालभते,—इति अत्र एषोऽर्थः समधिगतः"—सवनीयकाले त्रयाणाम् आलम्भः—इति। अथ अत्र पाठक्रमात्, किम् अग्नीषोमीयः पूर्वम् आलब्धव्यः? उत स्थानक्रमात् पूर्वं सवनीयः इति। कुतः?। पाठक्रमात्। एवं प्राप्ते ब्रूमः,—सवनीयः पूर्वं, "स्थानात्, यदि पूर्वम् अग्नीषोमीयः स्यात्, सवनीय स्थानं व्याहन्येत! "आश्विनं गृहीत्वा त्रिवृता यूपं परिवीय" इति। "ननु इतरथापि पाठक्रमोबाध्येत, बाध्यतां, तस्य हि प्रतिषेधार्थः सहशब्दः समाम्नातः, अप्रतिषिद्धं च आश्विनग्रहस्थानम्, तन्न बाधितव्यम्" (२वर्णकम्) भा०

"मुख्यक्रमेण वाङ्गानां तदर्थत्वात्" १४सू०

"सारस्वतौ भवतः एतत् वै द्विदैवत्यं मिथुनम्"—इति श्रूयते। तत्र सन्देहः,—किं स्त्रीदैवत्यस्य प्रथमं धर्माः? उत पुंदैवत्यस्य?—इति। नियमकारिणः शास्त्रस्य अभावात् अनियमः,—इति प्राप्ते ब्रूमः,—मुख्यक्रमेण वा नियमः स्यात्—इति स्त्रीदेवत्यस्य हि पूर्वं याज्यानुवाक्ययोः समाम्नानं, "प्रणो देवी सरस्वती"-इति। तस्मात् स्त्रीदैवत्यस्य पूर्वं प्रदानेन भवितव्यम्, तस्मात् स्त्रीदैवत्यस्य पूर्वं धर्माः कार्याः, तथा हि प्रधानकालता भवति अङ्गानाम्, इतरथा, यैः पादर्थैर्व्यवधानं सामर्थ्यात् अनुज्ञातं तेभ्योऽधिकैरपि व्यवधानं स्यात्"। भा०

"प्रकृतौ तु स्वशब्दत्वात् यथाक्रमं प्रतीयेत" १५सू०